हक्क-बुक्कौ



*अल्लाउद्दीन-खिल्जिः


मालिक-कफ़ूरस्य शिबिरे -
इयान् दीर्घः अवरोधः मास्तु। पूर्णतया आक्रमणं क्रियताम्।


उभयोः सेनयोः मध्ये सम्मुखयुद्धं जातं यस्य परिणामाः एकशिलानगरस्य कृते दुर्भाग्यपूर्णाः आसन्।


आत्मसमर्पणस्य नियमानुसारि प्रतापरुद्रः स्वकीयां सुवर्ण-प्रतिमां तत्प्रतिमायाः कण्ठे सुवर्ण-श्रृङ्ख्लाम् अपि निर्मापयित्वा ,मालिक-काफ़ूरं प्रति प्रेषितुं विवशः अभवत्।
सत्वरं ढिल्लिकां गत्वा सुल्तानं निवेदयानि यत् दक्षणविजयार्थं मार्गः उद्घाटितः।



द्वयोः वर्षयोः अनन्तरं यदा खिल्जिः मृतः-
अधुना एव समयः विदेशीय-बन्धनात् विमोचनार्थम्। ढिल्ल्याः कृते करदानं समाप्यताम्।
पश्चात् युद्धे नूतन-सुल्तान-गयासुद्दीन-तुग़लक़-द्वारा मन्दभागी राजा पुनः पराजयं लब्धवान्। यद्धि विजेतारः महत् लुण्ठनं स्वीकृत्य निर्गच्छन्ति स्म....
....साधारण-जनाः निराशया प्रकूजनं कृतवन्तः
अस्माकं राजा वीरः किन्तु वृद्धः। देशस्य युवभिः साहाय्यं कर्तव्यम्।
ढिल्लीतः लोभिनः पुनरागमिष्यन्ति अस्माकं नगराणि लुण्ठयितुम्। सङ्घर्षं करणीयम्।



*अधुना हम्पि इति नाम्ना ख्यातः


पुनः प्रताप-रुद्रः करं दातुम्
अस्वीकृतवान्।
राजन्! सुल्तानस्य सेना
प्रस्थिता।
स्वयं राजकुमारस्य नेतृत्वे।


आगच्छेत्।
एतद्वारं वयं
पूर्णतया सिद्धाः।



अनन्तरं युद्धे हक्क-बुक्कौ शौर्येण योत्स्यन्ते स्म।


तद्रात्रौ —
राजन्! सुल्तानः मृतः इति किम्वदन्ती श्रूयते।
अवश्यम् असत्यम्।
असत्यं वा न वा शत्रुचन्वाम् अस्माकम् आवश्यकतायै प्रसारितव्या।
समीचिन-युक्तिरेव। शत्रोः मनोबलं न्यूनीकरिष्यति।
सेनानायकानाम् अधिकांशः किम्वदन्तीं विश्वासितवान्।
सुल्तानः मृतः। ढिल्लीं प्रतिगच्छाम।
तत्र भवितव्याः वयम्।
सत्वरं प्रस्थानं कर्तव्यम्।
रात्रेः अन्धकारे सेनाध्यक्षं न सूचयित्वा सेनापतीनाम् अधिकांशः स्वसैनिकैः साकं ढील्लीं प्रति प्रस्थानं कृतवान्।


मार्गे हक्केन स्वीय-सैनिकैः च तेषामुपरि आकस्मिकाक्रमणं कृतम्।
भोः मित्राणि। ढील्लीं प्रति मार्गः पिहितः।
पृष्ठतः गच्छाम।
पलायमानाः।
चिन्ता मास्तु। तेषाम् आथित्यं सम्यक्तया भविष्यति।
मार्गः पिहितः।
जाले पतिताः वयम्।
द्वयोः सेनयोः मध्ये लग्नः शत्रुः नष्टो जातः।



प्रताप-रुद्रः प्रफुल्लितः।
महद्विजयस्य सन्दर्भे उत्सवं भवतु।
नैव राजन्! अपायः दूरीकृतः न।
वर्ष-द्वयानन्तरम्-
भोः हक्क! आनन्दम् अनुभवतु। ते पूर्णतया दूरीकृताः।
आम्! किन्तु स्वराज्य-रक्षकाः सदैव सतर्काः भवन्तु, स्वामिन्।
राजन्! सुल्तानस्य सेना पुनः प्रस्थिता। कस्मिन् अपि क्षणे अस्माकमुपरि आक्रमणं भवेत्।
आपत्तिध्वनिः श्रावयितव्यः। तान् प्रतिवारयिष्यामः।


यदा सद्युतिं प्रताप-रुद्रः अग्रेसरति स्म -
इदं निर्णायकं युद्धं भविष्यति मम वीर-युवानः! अग्रे गच्छन्तु शत्रुं सम्मुखीकुर्वन्तु।
हक्कस्य चिन्ता वर्धिता।
राजा शत्रु-क्षेत्रे अतीव अन्तः गतवान्, बुक्क।
हक्क राज्ञः पार्श्वे त्वरस्व। अत्र कार्य-निर्वहणम् अहमेव करोमि।
प्रताप-रुद्रस्य अश्वः बाण-प्रहारेण व्रणितो जातः।
सः एव राजा। सः हन्यताम्।
अश्वं विनापि राजा शत्रून् दूरीकृतवान्।
आगच्छत। शक्यते चेत् हत।


किन्तु शत्रुसङ्ख्या अत्यधिका। कस्यचन प्रहारात् तस्य राज्ञः खड्गम् क्षिप्तम्।
मा हन्यताम्। सुल्तानः तस्य सजीव-निग्रहणम् इच्छति।


एकशिलानगरस्य सैनिकाः इतस्ततः पलायितवन्तः।
राजा निगृहीतः।
धावत।


हक्कः पलायमानानां सैनिकानां मनोबलं वर्धयितुं निष्फलं प्रयत्नं कृतवान्।
समागत्य युद्धं कुरुत।
किमर्थम्? राजा च्युतः।
स्वप्राणान् रक्षयाम।


पश्चात् यदा प्रताप-रुद्रः ढिल्लीं प्रति नीयमानः आसीत्।
मम प्रतिष्ठां संरक्षयितुम् एकः एव विकल्पः अवशिष्टः।


निभृतम् अनुसरन्तौ हक्क-बुक्कौ अकस्मादेव अश्वौ स्थागितवन्तौ।
कीदृशं कोलाहलमिदम्? आशासे यत् राजा....
उपत्यकायाम् अधः गत्वा परिज्ञानं करवाव।


विषयस्य परिज्ञानं तयोः हृदयौ व्यदारयत्।
प्रताप-रुद्रः आत्महत्यां कृतवान्।
सुल्तानः अवश्यं सेनपतीन् दण्डयिष्यति।
हन्त! अस्माकम् एकमात्रा आशा लुप्ता।


निराशौ भ्रातरौ दक्षिणदिशि प्रस्थितौ।
बुक्क, अस्मदीयाः सर्वे प्रयासाः व्यर्थाः अभवन्।
नहि, भ्रातः! निराशः मास्तु। अस्मदीयं लक्ष्यम् पूर्णतां नेतव्यम्।
अकस्मादेव -
हक्क, सावधानम्!
यदा व्याघ्रः तले पतितः तदा तौ अपरिचितानां दलं मिलितवन्तौ।
हे युवन्! अयं व्याघ्रः मया दृष्टः एवं तस्य आखरात् अनुसृतः।
किन्तु मया हतः। भवान् कः?
अहं कुमार-रामः, कम्प्लि-राज्यस्य राजकुमारः।
आवां हक्क-बुक्कौ।


तौ कुमार-रामः राजानं कम्प्लि-देवं स्वीय-पितरं प्रति नीतवान्।
कर्णाटकस्य गौरववर्धनं कृतवन्तौ भवन्तौ।
किन्तु राजन् आवयोः नायकः प्रताप-रुद्रः लुप्तः।
चिन्ता मास्तु। कम्प्लि-प्रजा प्रताप-रुद्रस्य आदर्शान् अनुसरति।
भवद्गृहम् इति इव कम्प्लिं मत्वा लक्ष्य-पूर्त्यै कार्यस्य अनुवर्तनं कुरुताम्।
हक्क-बुक्कौ मृगयायां निपुणौ। कुमार-रामः बहुवारं ताभ्यां साकं गतवान्।
वार्ता आगता यत् गयासुद्दीनः मृतः। तस्य पुत्रः अधुना सुल्तान-पदासीनः।
अहो। जगरुकतया भवितव्याः वयम्। सः महत्त्वाकाङ्क्षी एव।


कतिपयानां दिवसानाम् अनन्तरम् —
दृश्यताम्। धूलि-मेघः।
तुग़लक़-सेना किम्? पूर्णतया योद्धुम् इच्छामि।


किन्तु तुग़लक़-सेना नासीत्। तुग़लक़स्य पितृष्वसेयः बहाउद्दीनः एवं च तस्य अनुचराः आसन्।
सुल्तानस्य प्रकोपः सम्पादितः मया। तस्मात् सुल्तानात् पलायमानः अहम्। मां निग्रहीष्यति चेत् अवश्यं हन्ति।
राजानं पुरतः नेष्यामि। सः दयालुः।


चिन्ता मास्तु, बहाउद्दीन। कम्प्ल्यां शरणार्थिनः सुरक्षिताः।
भवत्-पूर्व-शत्रवे मे दयादानं मां भावुकं करोति।


अचिरादेव बहाउद्दीनः कम्प्ल्याम् अस्ति इति तुग्लकस्य अनुचराः परिज्ञातवन्तः। ते कम्प्ल्याम् उपरि निरोधः स्थापितवान्।
प्रताप-रुद्रस्य मृत्योः प्रतिशोधं गृहीतुं समयः आसन्नः।


युद्धारम्भात् पूर्वे
शान्तिवार्तार्थम् आगतः अहम्। भवतां राज्ञः पुरतः नीयै।
तस्मै प्रवेशो दीयताम्।


अनावश्यकं रक्त-पातं वर्जयितुम् इच्छामः। बहाउद्दीनः प्रतिदीयते चेत् प्रतिगमिष्यामः।
शरणार्थिनः विश्वासस्य हननस्य स्थाने वीरमरणं स्वीकरिष्यामः।


अनुगामि युद्धं भीषणम् आसीत्।




*तुङ्गभद्र-नदी-तीरे आनेगुन्दिः


तद्रारौ शत्रु-परिज्ञानं विना कम्प्लितः किष्किन्धां प्रति निर्गमनं जातम्।
यदा तुग़लक-सेनाध्यक्षः घटनां ज्ञातवान्....
विना बहाउद्दीनेन प्रतिगमनं नैव। किष्किन्धा गम्यताम्।
किष्किन्धायां युद्धस्य आरम्भः जातः।


तद्रात्रौ —
पितः! एतद्द्वारं विजयं निश्चितं न स्यात्
अतः बहाउद्दीनः सुरक्षितं स्थानं नेतव्यः।
होय्सळ-राज्यं प्रति अनुचरैः साकं बहाउद्दीनः प्रेषितः।
अग्रिमे दिने, युद्धे उभौ पक्षौ बहुनष्टम् लब्धवन्तौ।
तैः नष्टं सोढुं शक्यते किन्तु अस्माभिर्नैव।
पितः इतोऽपि दिवसमेकं सोढुं शक्यते एव।


प्रातः राजस्त्रियः अग्निप्रवेशं
कृतवत्यः।


द्वारम् उद्घाटितम्। राजा, राज-
कुमारः, हक्कः बुक्कश्च अग्रे
गतवन्तः।


अनुगामिनि युद्धे हक्क-बुक्कौ व्रणितौ भूत्वा
मूर्छितौ पतितवन्तौ।



यदा तौ चेतनां पुनर्लब्धवन्तौ तदा शवैः आच्छादितां रण-भूमिं दृष्टवन्तौ।
राजा कुमारश्च वीरगतिं गतवन्तौ।
हे भगवन्! किमर्थम् आवां जीवितौ?
वीरगतिं गतानां कृते अन्तिम-संस्कारान् आचरितवन्तौ।
भगवतः अनुग्रहेण भवताम् अस्थिभ्यः महतः साम्राज्यस्य उत्पन्नः भविष्यति तेषाम् आदर्शानां संस्थापनार्थाय येषां कृते भवन्तः वीरमरणं स्वीकृतवन्तः।
भ्रातः, अधुना कुत्र गम्यताम्।
प्रथमं बहाउद्दीनः क्षेमस्थितिं प्राप्तवान् वा न वा इति परिज्ञातव्यम्।
होय्सळ-राजधानीं पादैः व्रजतः स्म।



यदा तौ होय्सळ-नरेशस्य दर्शनं प्राप्तवन्तौ तदा नरेशः दुर्वार्तां ज्ञापितवान्।
तुग्लक-सेना अकास्मिक-आक्रमणम् अकरोत् येन वयं पराजिताः एवं च बहाउद्दीनः निगृहीतः।
हे राजन्! लुप्त-क्षेत्राणि पुनर्लभ्यन्ताम्।
दुर्भाग्यवशात् मत्पार्श्वे अधिकाः सैनिकाः न सन्ति।
किन्तु भवन्तम् अस्मत्-साम्राज्यस्य उत्तर-भागस्य राज्यपाल-रूपेण नियोजयामि।
पदव्यां केवलम् अधिकार-शक्तिः निहिता किन्तु सैन्य-शक्तिः वा क्षेत्र-शक्तिः वा नैव।
सैन्य-शक्ति-प्राप्त्यर्थं कार्यं करोमि येन लुप्त-क्षेत्राणि पुनर्लभ्यन्ते राजन्।



एकशिलानगरे पराभूतः। कम्प्ल्यामपि। किन्तु इदानीमपि विजयम् उदीरयति। हक्क, भवतः मनोबलं कुतः उत्पद्यते?
मातृभूमिं प्रति प्रेम अतिरिच्य कुतः भवेत् राजन्?
यदा हक्क-बुक्कौ कम्प्लिं प्रति प्रस्थितौ ----
हे भगवन्! लक्ष्यप्राप्त्यौ तयोः साहाय्यं करोतु।
कम्प्ल्यां प्रवेशात् पूर्वं कश्चन अजपालः तौ भ्रातरौ स्थगयितवान्।
प्रभू! सुल्तानेन नियुक्तेन राज्यपालेन घोषितं यत् भवन्तौ हत्वा प्रमाणीक्रियते चेत् पुरुस्कारः दीयते। कम्प्ल्यां मा प्रविशताम्।
किञ्चित् कालम् अज्ञातौ भवाव।


अतः हक्क-बुक्कौ अजपालस्य वेशं धारयित्वा कम्प्लि-राज्यपालात् तिरोभूतवन्तः


एकदा अजान् चारयितुं वनस्य अन्तः नीतवन्तौ।
पश्य, भ्रातः! कश्चन साधुः तपसि निरतः।
तस्य आशिषः स्वीकर्तव्याः।


सः ऋषिः विद्यारण्यः आसीत्। तस्य नेत्रोन्मीलनं पर्यन्तं प्रतीक्षां कृतवन्तौ।



चिरकालात् पश्चात् यदा तत्साधुः नेत्रौ उन्मीलितवान् तदा तौ भ्रातरौ साधोः चारणयोः पतितवन्तौ।
आशिषः प्रदातु हे मुनिवर्य आवां हक्क-बुक्कौ।
हक्क-बुक्कौ? वीर-भ्रातरौ? उत्तिष्ठतम्।
युवयोः प्रतीक्षायां निरतः अस्मि। मम देशस्य शून्यता मम हृदयं विदारयति। दूरदृष्टि-साहस-युक्ता-नराणां मह्यम् आवश्यकता।
मुनिवर्य आवां तुगलक-जनानां ध्यानम् न आकर्षयित्वा सेनानिर्माणे कष्टताम् अनुभवन्तौ।
स्मर्तव्यं यत् ईश्वरः स्वयंसहायकानां साहाय्यं करोति।
अस्मिन् कार्ये साहाय्यं शक्यते मया। मया सह आगच्छतम्।


अत्रत्ये विस्तृते अपगोहे सहस्रशः सैनिकानां प्रशिक्षणं शक्यते।
किन्तु अत्र कथं रहसि आनीयन्ते?
विद्यारण्य-मुनिः इतोऽपि अन्तः तौ नीतवान् यत्र गुहा सङ्कीर्णा जायमाना आसीत्...
एवं च ते प्रसर्पणे विवशाः अभवन्।
अयं निगूढ-मार्गः कुत्र नयति?
शीघ्रमेव द्रक्ष्यते।
दुर्गस्य समीपे मन्दिरे?
एवमेव। सरलं किल? अस्मदीयाः सैनिकाः अत्र धार्मिक-व्याजेन आगमिष्यन्ति तत् पश्चात् सम्मेलने युवां कार्यं कुरुतम्।



विद्यारण्यस्य प्रवचनानि विशाल-समूहान् आकर्षयति स्म।
ततः श्री-भगवान् उवाच - कर्मणि एव अधिकारः ते मा फलेषु कदाचन।
केचन अधिकारिणः सम्मेलनानि इमानि सन्देह-दृष्ट्या दृष्टवन्तः। किन्तु राज्यपालः मुहम्मद-खानः न।
धार्मिकः समूहः अयं त्यज्यताम्।
प्रवचनानन्तरम् अहिंसकाः धार्मिकाः इव दृश्यमानाः इमे नराः........
... हक्क-बुक्काभ्यां सैनिक-प्रशिक्षणं स्वीकृतवन्तः।


एकदा
भवतः आशीषः इच्छावः मुनिवर्य
विजयिनौ भवतम्।
रात्रि-तिमिरे तौ स्व-सैनिकैः सह गतवन्तः।
किष्किन्धायां स्व-सैनिकान् बहिः नियोजयित्वा हक्कः दुर्गस्य भित्तेः आरोहणं कृतवान्।
अन्तः द्वारं प्राप्तुं युद्धं कृत्वा ....



तद्-द्वारम् उद्घाटयितवान् येन बुक्कः स्वीय-सैनिकाः च हक्कं मिलितवन्तः।
दुर्गः अस्मदीयः एव।
अनुगामिनि युद्धे राज्यपालः स्व-अनुचरैः साकं पलायितवान्।
किष्किन्धायाः प्रजा हक्क-बुक्कौ विपुलं स्वागतीकृतवती।
हक्क-बुक्कौ प्रत्यागतवन्तौ।
वयं पुनः स्वतन्त्राः।
विजये सत्यपि विद्यारण्यः सावधानीकृतवान्।
अयं केवलम् आरम्भः। भवदीय-लक्ष्यम् इतोऽपि सुदूरे विद्यते।
भवदाशीषा प्रजायाः मङ्गल-कामनया च अवश्यं प्राप्स्यते महात्मन्।


एकदा हक्क-बुक्कौ मृगयार्थं स्वीय-श्वभिः साकं तुङ्गभद्राम् अतिक्रामतः स्म।
यदा ते अपर-तीरं प्राप्तवन्तः तत् पश्चात् श्वानः कस्यचन शशस्य अनुसरणं कर्तुम् आरब्धवन्तः येन शशः इतोऽपि शीघ्रतया धावनं कृतवान्।
तत् पश्चात् अकस्मादेव शशः स्थगितवान् एवंच शुनः सम्मुखीकृतवान्।
किमेतत्? शशः श्वभिः युद्धं कर्तुम् उद्युक्तः? विचित्रमेव।
यदा विद्यरण्यः घटनया सूचितः--
अत्रतयस्य दिव्य-तेजसः शशस्य साहसः वर्धितः।
अत्र दुर्गं निर्मापयित्वा राज्यं संस्थापयतम्।


अचिरादेव तत्स्थाने एव नगरं निर्मितम्।
अस्माकं शक्तेः प्रेरणायाः च स्रोतः भवान् एव। अतएव अस्य नगरस्य नाम विद्यानगरं भविष्यति।
साधारण-मर्त्यस्य नामधेयेन नामकारणं मा कुरुतम्। इदं नगरं देशस्य कृते विजयं सन्दर्शयति। विजयस्य नगरमस्ति। विजयनगरम् उच्यताम्।
हरिहर-रायः इति नाम स्वीकृत्य विजयनगरस्य प्रथमः राजा अभवत् हक्कः। इदं लघु-राज्यं कालेन महत् साम्राज्यम् अभवत् यत् त्रिशतवर्षेभ्यः अधिकं विराजते स्म।